# shrIbagalAShTottarashatanAmastotram

# શ્રીબગલાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : bagalAShTottarashatanAmastotram 2

File name : bagalAmukhI108.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : viShNuyAmale nAradaviShNusa.nvAde. See corresponding nAmAvalI.

Latest update : April 04, 2005

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 26, 2022

*sanskritdocuments.org*

# શ્રીબગલાષ્ટોત્તરશતનામસ્તોત્રમ્

અથવા બગલામુખી અષ્ટોત્તરશતનામસ્તોત્રમ્ ।

શ્રીગણેશાય નમઃ ।
નારદ ઉવાચ ।
ભગવન્દેવદેવેશ સૃષ્ટિસ્થિતિલયાત્મક ।
શતમષ્ટોત્તરં નામ્નાં બગલાયા વદાધુના ॥ ૧॥

શ્રીભગવાનુવાચ ।
શ‍ૃણુ વત્સ પ્રવક્ષ્યામિ નામ્નામષ્ટોત્તરં શતમ્ ।
પીતામ્બર્યાં મહાદેવ્યાઃ સ્તોત્રં પાપપ્રણાશનમ્ ॥ ૨॥

યસ્ય પ્રપઠનાત્સદ્યો વાદી મૂકો ભવેત્ક્ષણાત્ ।
રિપુણાં સ્તમ્ભનં યાતિ સત્યં સત્યં વદામ્યહમ્ ॥ ૩॥

ૐ અસ્ય શ્રીપીતામ્બરાષ્ટોત્તરશતનામસ્તોત્રસ્ય સદાશિવ ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રીપીતામ્બરા દેવતા,
શ્રીપીતામ્બરાપ્રીતયે પાઠે વિનિયોગઃ ।
ૐ બગલા વિષ્ણુવનિતા વિષ્ણુશઙ્કરભામિની ।
બહુલા વેદમાતા ચ મહાવિષ્ણુપ્રસૂરપિ ॥ ૪॥

મહામત્સ્યા મહાકૂર્મ્મા મહાવારાહરૂપિણી ।
નારસિંહપ્રિયા રમ્યા વામના બટુરૂપિણી ॥ ૫॥

જામદગ્ન્યસ્વરૂપા ચ રામા રામપ્રપૂજિતા ।
કૃષ્ણા કપર્દિની કૃત્યા કલહા કલકારિણી ॥ ૬॥

બુદ્ધિરૂપા બુદ્ધભાર્યા બૌદ્ધપાખણ્ડખણ્ડિની ।
કલ્કિરૂપા કલિહરા કલિદુર્ગતિ નાશિની ॥ ૭॥

કોટિસૂર્ય્યપ્રતીકાશા કોટિકન્દર્પમોહિની ।
કેવલા કઠિના કાલી કલા કૈવલ્યદાયિની ॥ ૮॥

કેશવી કેશવારાધ્યા કિશોરી કેશવસ્તુતા ।
રુદ્રરૂપા રુદ્રમૂર્તી રુદ્રાણી રુદ્રદેવતા ॥ ૯॥

નક્ષત્રરૂપા નક્ષત્રા નક્ષત્રેશપ્રપૂજિતા ।
નક્ષત્રેશપ્રિયા નિત્યા નક્ષત્રપતિવન્દિતા ॥ ૧૦॥

નાગિની નાગજનની નાગરાજપ્રવન્દિતા ।
નાગેશ્વરી નાગકન્યા નાગરી ચ નગાત્મજા ॥ ૧૧॥

નગાધિરાજતનયા નગરાજપ્રપૂજિતા ।
નવીના નીરદા પીતા શ્યામા સૌન્દર્ય્યકારિણી ॥ ૧૨॥

રક્તા નીલા ઘના શુભ્રા શ્વેતા સૌભાગ્યદાયિની ।
સુન્દરી સૌભગા સૌમ્યા સ્વર્ણાભા સ્વર્ગતિપ્રદા ॥ ૧૩॥

રિપુત્રાસકરી રેખા શત્રુસંહારકારિણી ।
ભામિની ચ તથા માયા સ્તમ્ભિની મોહિની શુભા ॥ ૧૪॥

રાગદ્વેષકરી રાત્રી રૌરવધ્વંસકારિણી ।
યક્ષિણી સિદ્ધનિવહા સિદ્ધેશા સિદ્ધિરૂપિણી ॥ ૧૫॥

લઙ્કાપતિધ્વંસકરી લઙ્કેશી રિપુવન્દિતા ।
લઙ્કાનાથકુલહરા મહારાવણહારિણી ॥ ૧૬॥

દેવદાનવસિદ્ધૌઘપૂજિતા પરમેશ્વરી ।
પરાણુરૂપા પરમા પરતન્ત્રવિનાશિની ॥ ૧૭॥

વરદા વરદારાધ્યા વરદાનપરાયણા ।
વરદેશપ્રિયા વીરા વીરભૂષણભૂષિતા ॥ ૧૮॥

વસુદા બહુદા વાણી બ્રહ્મરૂપા વરાનના ।
બલદા પીતવસના પીતભૂષણભૂષિતા ॥ ૧૯॥

પીતપુષ્પપ્રિયા પીતહારા પીતસ્વરૂપિણી ।

ઇતિ તે કથિતં વિપ્ર નામ્નામષ્ટોત્તરં શતમ્ ॥ ૨૦॥

યઃ પઠેત્પાઠયેદ્વાપિ શ઼ૃણુયાદ્વા સમાહિતઃ ।
તસ્ય શત્રુઃ ક્ષયં સદ્યો યાતિ નૈવાત્ર સંશયઃ ॥ ૨૧॥

પ્રભાતકાલે પ્રયતો મનુષ્યઃ પઠેત્સુભક્ત્યા પરિચિન્ત્ય પીતામ્ ।
દ્રુતં ભવેત્તસ્ય સમસ્તબુદ્ધિર્વિનાશમાયાતિ ચ તસ્ય શત્રુઃ ॥ ૨૨॥

॥ ઇતિ શ્રીવિષ્ણુયામલે નારદવિષ્ણુસંવાદે
શ્રીબગલાષ્ટોત્તરશતનામસ્તોત્રં સમાપ્તમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

*shrIbagalAShTottarashatanAmastotram*
pdf was typeset on December 26, 2022

Please send corrections to *sanskrit@cheerful.com*